# Shri Matangi Stotram

# શ્રીમાતઙ્ગીસ્તોત્રમ્

## Document Information

Text title : Matangi Stotra 1

File name : mAtangIstotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Lalitha Parameswari parameswari.lalitha at gmail.com

Proofread by : Lalitha Parameswari, NA

Latest update : June 2, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીમાતઙ્ગીસ્તોત્રમ્

માતઙ્ગીં મધુપાનમત્તનયનાં માતઙ્ગ સઞ્ચારિણીં
કુમ્ભીકુમ્ભવિવૃત્તપીવરકુચાં કુમ્ભાદિપાત્રાઞ્ચિતામ્ ।
ધ્યાયેઽહં મધુમારણૈકસહજાં ધ્યાતુસ્સુપુત્રપ્રદાં
શર્વાણીં સુરસિદ્ધસાધ્યવનિતા સંસેવિતા પાદુકામ્ ॥ ૧॥

માતઙ્ગી મહિષાદિરાક્ષસકૃતધ્વાન્તૈકદીપો મણિઃ
મન્વાદિસ્તુત મન્ત્રરાજવિલસત્સદ્ભક્ત ચિન્તામણિઃ ।
શ્રીમત્કૌલિકદાનહાસ્યરચના ચાતુર્ય રાકામણિઃ
દેવિત્વં હૃદયે વસાદ્યમહિમે મદ્ભાગ્ય રક્ષામણિઃ ॥ ૨॥

જયદેવિ વિશાલાક્ષિ જય સર્વેશ્વરિ જય ।
જયાઞ્જનગિરિપ્રખ્યે મહાદેવ પ્રિયઙ્કરિ ॥ ૩॥

મહાવિશ્વેશ દયિતે જય બ્રહ્માદિ પૂજિતે ।
પુષ્પાઞ્જલિં પ્રદાસ્યામિ ગૃહાણ કુલનાયિકે ॥ ૪॥

જયમાતર્મહાકૃષ્ણે જય નીલોત્પલપ્રભે ।
મનોહારિ નમસ્તેઽસ્તુ નમસ્તુભ્યં વશઙ્કરિ ॥ ૫॥

જય સૌભાગ્યદે નૃણાં લોકમોહિનિ તે નમઃ ।
સર્વૈશ્વર્યપ્રદે પુંસાં સર્વવિદ્યાપ્રદે નમઃ ॥ ૬॥

સર્વાપદાં નાશકરીં સર્વદારિદ્ર્યનાશિનીમ્ ।
નમો માતઙ્ગતનયે નમશ્ચાણ્ડાલિ કામદે ॥ ૭॥

નીલામ્બરે નમસ્તુભ્યં નીલાલકસમન્વિતે ।
નમસ્તુભ્યં મહાવાણિ મહાલક્ષ્મિ નમોઽસ્તુતે ॥ ૮॥

મહામાતઙ્ગિ પાદાબ્જં તવ નિત્યં નમામ્યહમ્ ।
એતદુક્તં મહાદેવ્યા માતઙ્ગયાઃ સ્તોત્રમુત્તમમ્ ॥ ૯॥

સર્વકામપ્રદં નિત્યં યઃ પઠેન્માનવોત્તમઃ ।
વિમુક્તસ્સકલૈઃ પાપૈઃ સમગ્રં પુણ્યમશ્નુતે ॥ ૧૦॥

રાજાનો દાસતાં યાન્તિ નાર્યો દાસીત્વમાપ્નુયુઃ ।
દાસીભૂતં જગત્સર્વં શીઘ્રં તસ્ય ભવેદ્ ધ્રુવમ્ ॥ ૧૧॥

મહાકવીભવેદ્વાગ્ભિઃ સાક્ષાદ્ વાગીશ્વરો ભવેત્ ।
અચલાં શ્રિયમાપ્નોતિ અણિમાદ્યષ્ટકં લભેત્ ॥ ૧૨॥

લભેન્મનોરથાન્ સર્વાન્ ત્રૈલોક્યે નાપિ દુર્લભાન્ ।
અન્તે શિવત્વમાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૧૩॥

શ્રીરાજમાતઙ્ગી પાદુકાર્પણમસ્તુ ।

ઇતિ શ્રીમાતઙ્ગીસ્તોત્રં સપૂર્ણમ્ ।

Encoded and proofread by Lalitha Parameswari
parameswari.lalitha at gmail.com

---

*Shri Matangi Stotram*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*